# भागः IV
# भाषा I
# संस्कृतम्

***निर्देशः :*** *अधोलिखितान् श्लोकान् पठित्वा षट् प्रश्नानां (प्रश्नसङ्ख्या 91 – 96) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चिनुत ।*

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद धर्मं ततः सुखम् ॥ 1 ॥

विश्वासो हि ययोर्मध्ये तयोर्मध्येऽस्ति सौहृदम् ।
यस्मिन्नैवास्ति विश्वासः तस्मिन् मैत्री क्व सम्भवा ॥ 2 ॥

अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत् ।
जयेत कदर्यं दानेन जयेत् सत्येन चानृतम् ॥ 3 ॥

अनाहूतः प्रविशति अपृष्टो बहुभाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥ 4 ॥

षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता ॥ 5 ॥

**91.** विनयात् किं प्राप्नोति ?
(1) सत्यम्
(2) विश्वासम्
(3) धनम्
(4) पात्रताम्

**92.** मैत्री कुत्र न भवितुम् अर्हति ?
(1) यत्र धनं नास्ति ।
(2) यत्र विश्वासः न वर्तते ।
(3) यत्र असमानता वर्तते ।
(4) यत्र क्रोधः भवति ।

**93.** 'कदर्यम्' इत्यस्य शब्दस्य कोऽर्थः?
(1) धनव्यये संकोचः
(2) दीनता
(3) निर्दयम्
(4) दुर्बलता

**94.** 'यस्मिन्नैवास्ति' अत्र निम्नलिखितेषु कः सन्धिविच्छेदः समीचीनः ?
(1) यस्मिन् + न + ऐव + अस्ति
(2) यस्मिन् + ना + इव + आस्ति
(3) यस्मिन् + न + एव + अस्ति
(4) यस्मिन् + न + इव + अस्ति

**95.** 'इच्छता' पदस्य निर्वचनम् किम् भवति ?
(1) इष् + अत् + आ
(2) इष् + शतृ + आ (तृतीया-एकवचनम्)
(3) इच्छ् + क्त + स्त्रीलिङ् + प्रथमा-एकवचनम्
(4) इच्छ् + अच् + ता + तृतीया-एकवचनम्

**96.** निम्नलिखितेषु को धातुः भ्वादिगणस्य विद्यते ?
(1) याति
(2) ददाति
(3) जयेत्
(4) प्रविशति

***निर्देशः :*** *अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां (प्रश्नसङ्ख्या 97 – 105) विकल्पात्मकोत्तरेषु उचिततमम् उत्तरं चिनुत ।*

एकदा षड्वर्षीयः श्रीकृष्णः वृन्दावने यमुनातटम् अगच्छत् । गोपाः अपि तेन सह अगच्छन् । गोपाः पिपासया आकुलाः भूत्वा यमुनाजलम् अपिबन् । ते मूर्च्छिताः अभवन् । श्रीकृष्णः तान् मूर्च्छितान् दृष्ट्वा व्याकुलः अभवत् । वस्तुतः यमुनाजले कालियनागस्य कुण्डम् आसीत् । तेन यमुनाजलं विषज्वालाभिः विषाक्तं जातम् । अनेके खगाः पशवः च तत् जलं पीत्वा मृत्युं प्राप्ताः । वायुः अपि तेन विषयुक्तः अभवत् । वृक्षाः तेन वायुना शुष्काः जाताः ।

Prepp Your Personal Exams Guide

यदा श्रीकृष्णः एतत् सर्वम् अपश्यत् सः एकं वृक्षम् आरोहत्। तस्मात् वृक्षात् सः विषयुक्ते जले अकूर्दत । कालियनागस्य एकाधिकशतं फणाः आसन् । सः तान् प्रसार्य कृष्णं प्रहर्तुम् ऐच्छत्। श्रीकृष्णः तस्य फणान् आरुह्य अनृत्यत्। कालियनागस्य फणाः शनैः शनैः छिन्नाः भिन्नाः अभवन्। मुखात् रक्तं प्रावहत्। सः हस्तौ संयोज्य अवदत् — "भगवन्! वयं नागाः जन्मतः एव विषयुक्ताः। अयं न मम अपराधः। भवान् एव सर्वप्राणिनां प्रभुः। अनुग्रहं करोतु निग्रहं वा।" एवं निग्रहात् परम् अनुग्रहं कुर्वन् श्रीकृष्णः अवदत — रे दुष्ट! किं न जानासि त्वं यत् तव कारणात् सर्वं जलं विषयुक्तं भवति। इतः कुत्रापि अन्यत्र गच्छ इति। सर्पः ततः पलायितः। एवं च यमुना विषरहिता जाता।

**97.** यमुनाजलं के अपिबन्?

(1) गोपाः

(2) पक्षिणः

(3) गावः

(4) श्रीकृष्णस्य वत्साः

**98.** यमुनाजलं केन कारणेन विषाक्तम् अभवत्?

(1) मथुरानगरस्य दूषितनदेभ्यः दूषितं जलं यमुनायां प्रावहत्।

(2) तत्र वायुमण्डलं विशुद्धम् नासीत्।

(3) यमुनाजले कालियनागस्य विषकुण्डम् आसीत्।

(4) तत्र पर्वतकन्दरात् विषाक्तं जलं प्रवहति स्म।

**99.** श्रीकृष्णः कुत्र नृत्यं कृतवान्?

(1) कालियनागस्य एकस्मिन् फणे

(2) यमुनाजले

(3) निकुञ्जेषु

(4) कालियनागस्य फणेषु

**100.** "भवान् एव सर्वप्राणिनां प्रभुः" कस्य इदम् कथनम्?

(1) गोपानाम्

(2) नागरिकाणाम्

(3) नागपत्न्याः

(4) नागस्य

**101.** 'तृष्णया' इत्यस्मिन्नर्थे गद्यांशे कः शब्दः प्रयुक्तः?

(1) पिपासया

(2) अकुलाः

(3) विषयुक्ता

(4) शुष्काः

**102.** 'प्रसार्य' इत्यस्य शब्दस्य निम्नलिखितेषु कोऽर्थः?

(1) विदीर्य

(2) विस्तीर्य

(3) आच्छाद्य

(4) संगृह्य

**103.** 'पीत्वा' इत्यस्मिन् शब्दे को धातुः कश्च प्रत्ययः?

(1) पी + क्त्वा

(2) पी + क्तवतु

(3) पिब् + क्त्वा

(4) पा + क्त्वा

**104.** 'आसीत्' कस्य लकारस्य रूपम् अस्ति?

(1) लुङ्

(2) विधिलिङ्

(3) लट्

(4) लङ्

**105.** 'गच्छ' कस्य लकारस्य, पुरुषस्य वचनस्य च रूपम् अस्ति?

(1) गम् + विधिलिङ् मध्यमपुरुषः + द्विवचन्

(2) गच्छ् + लोट् उत्तमपुरुषः + एकवचनम्

(3) गम् + लोट् मध्यमपुरुषः + एकवचनम्

(4) गच्छ् + लोट् मध्यमपुरुषः + एकवचनम्

*निर्देशः : सर्वाधिकं समीचीनं विकल्पं चित्वा निम्नलिखितप्रश्नानाम् (प्रश्नसङ्ख्या 106 – 120) उत्तरं दीयताम् ।*

**106.** *कथनम् (A) :*

ध्वनिग्रामस्य उच्चारणं छात्रस्य शुद्ध-उच्चारण स्वाभाविकतां शिथिलां करोति।

*कारणम् (R) :*

यदा नवोदित शिष्या स्व-आविष्कृतं उच्चारणं प्रयुञ्जन्ति तदा तेषां शुद्धोचारण योग्यता न शिथिलीभवति।

निम्नलिखितेभ्यः विकल्पेभ्यः समीचीनम् उत्तरं चिनुत –

(1) (A) सत्यम् अस्ति, परं (R) मिथ्या अस्ति।
(2) (A) मिथ्या अस्ति, परं (R) सत्यम् अस्ति।
(3) (A) च (R) च उभे उत्तरे समीचीने स्तः। (R), (A) इत्यस्य समीचीनं व्याख्यानम् अस्ति।
(4) (A) च (R) च उभे समीचीने, (R), (A) इत्यस्य समीचीनं व्याख्यानं ***नास्ति***।

**107.** नवीनां भाषां शिक्षन्तः छात्राः प्रायः तस्याः भाषायाः उच्चारणनियमानां कारणात् तां भाषां भाषितुं विश्वासस्य न्यूनताम् अनुभवन्ति। तां समस्यां निवारयितुं एकः मार्गः अयम् अस्ति –

(1) केनापि भाषाविशेषज्ञेन सह परामर्शं कृत्वा सततं अभ्यासः।
(2) यदा त्रुटयाः भवन्ति तासां तदैव संशोधनम्।
(3) छात्राः कक्षायां उच्चस्वरेण पठन्तु।
(4) तादृशानां क्रीडासदृशगतिविधीनां प्रयोगः। यस्मिन् कक्षायां मौखिक-अन्तःसम्पर्कः भवेत्।

**108.** कश्चिद् अध्यापकः तृतीयकक्षायां नवीनं शब्दराशिं छात्रेभ्यः प्रस्तौति। निम्नलिखितासु का पद्धतिः शब्दराशिं प्रस्तौतुं प्रभाविनी अस्ति ?

(1) अध्यापकः छात्रान् प्रकरणानुसारं शब्दस्य अर्थं विवृणुयात्।
(2) अध्यापकः शब्दार्थं श्यामपटले लिखेतु छात्रान् च तं कण्ठस्थीकर्तुं कथयेत्।
(3) अध्यापकः छात्रान् विपरीतार्थकान् शब्दान् अर्थैः सह तेषां भाषायां वदेत्।
(4) अध्यापकः तान् शब्दस्य समीचीनां परिभाषां वदेत्।

**109.** भाषा-शिक्षणम् विषयः अस्ति –

(1) उत्पादनस्य
(2) कौशलस्य
(3) अधिग्रहणस्य (Acquisition)
(4) प्रक्रियायाः

**110.** पठनविधीनां छात्राणां क्रियाभिः सह समीचीनं मेलनं कुरुत –

| | *पठनविधयः* | | *छात्राणां क्रियाः* |
|---|---|---|---|
| A. | सम्भावना-कथनम् (Predicting) | i. | लेखनपद्धत्या लेखकानुभूति ज्ञानम् |
| B. | प्रवृत्ति- अनुमानम् | ii. | ते अपरिचित शब्दार्थं ज्ञातुं पाठ विभाजनस्य सहायतां गृह्णन्ति |
| C. | प्रकरणानुसारं अर्थावबोध | iii. | शीर्षकानि, भूमिकादि च ज्ञात्वा विषय-वस्तु जानन्ति |
| D. | गहनाध्ययनम् | iv. | एकस्मिन् पाठविभागे भाषाप्रयोगं ज्ञातुं यतन्ते |
| E. | पाठव्यवस्था ज्ञानम् | v. | पाठस्य विचारान् ज्ञातुं शीर्षक-चित्रादीनि प्रयुञ्जन्ति |

(1) A-ii, B-i, C-iii, D-iv, E-v
(2) A-iv, B-iii, C-ii, D-i, E-v
(3) A-v, B-i, C-ii, D-iv, E-iii
(4) A-i, B-iv, C-v, D-ii, E-iii

**111.** उदाहरणानुसारं निम्नलिखितवाक्यस्य पद्धतिं चिनुत –

*'भाषाप्रयोगे अहं भाषायाः शुद्धप्रयोगे केन्द्रीभूतो भवामि'*

(1) आत्म-परीक्षणम्
(2) अपरस्यां भाषायाम् अनुवादः
(3) कण्ठस्थीकरणम्
(4) पुनरावृत्तिः

**112.** द्वितीयायां कक्षायां छात्राः गीतं गायन्ति –

"शिरः स्कन्धौ, जानू, अङ्गुल्यः।" यदा ते गीतं गायन्ति, तदा ते सम्बन्धित-शरीराङ्गाणि स्पृशन्ति। अध्यापकेन पाठने का पद्धतिः प्रयुज्यते ?

(1) समग्र-शरीर-प्रतिक्रिया (Total Physical Response)
(2) विभिन्न दर्शनग्रहणम् (Eclectic)
(3) श्रवणभाषीयता (Audio-lingual)
(4) सम्प्रेषणात्मकं भाषा-अध्यापनम् (Communicative Language Teaching)

**113.** पूर्व-पाठे प्रयुक्तानां शब्दानां विषये छात्राः पञ्चप्रश्नानां उत्तराणि दातुं समूहेषु कार्यं कुर्वन्ति। तदा ते अन्यसमूहेन सह परस्परं प्रश्नोत्तराणि विनियमन्ति। एतद् उदाहरणम् अस्ति –

(1) पठनमूल्याङ्कनस्य (Reading assessment)
(2) सहपाठि-मूल्यांकनस्य (Peer Assessment)
(3) स्वमूल्याङ्कनस्य (Self-assessment)
(4) प्रतिपुष्टेः (Feedback)

**114.** यदा अध्यापकः मह्यं पत्रं ददाति यस्मिन् कश्चित्शब्दः सूक्तिर्वा अङ्कितः अङ्किता अस्ति, तथा च अहम् इमं शब्दं अनुमातुं सम्पूर्णां कक्षां कथयामि। मह्यं एतत्कार्यं रोचते। अस्मिन् विषये छात्राणां टिप्पण्यः ज्ञातव्याः, तेषां अपेक्षित टिप्पण्यश्चापि ज्ञातव्याः –

(1) अहं भाषां तदा सम्यक् स्मरामि यदा अहं पत्रात् सूक्तिं कण्ठस्थीकरोमि।
(2) अहं भाषां तदा सम्यक् स्मरामि अहं अस्यां गतिशीलो भवामि।
(3) अहं भाषां तदा सुष्ठु स्मरामि यदा अहं तां पश्यामि।
(4) अहं भाषां तदा सम्यक् स्मरामि यदा अहं तां शृणोमि।

**115.** *कथनम् (A) :*
सर्वे छात्राः ये विद्यालये प्रवेशं गृह्णन्ति, स्ववयः अनुसारं सक्षमा भाषाप्रयोक्तारः सन्ति।
*कारणम् (R) :*
भाषायाः संस्कृतेश्च वैविध्येन ते स्वयोग्यताः प्रदर्शयितुं न समर्थाः।
निम्नलिखितानां विकल्पानां सर्वोपयुक्तं उत्तरं चिनुत।

(1) (A) सत्यम् अस्ति, परं (R) मिथ्या अस्ति।
(2) (A) मिथ्या अस्ति, परं (R) सत्यम् अस्ति।
(3) (A) च (R) च उभे उत्तरे समीचीने स्तः। (R), (A) इत्यस्य समीचीनं व्याख्यानम् अस्ति।
(4) (A) च (R) च उभे समीचीने, (R), (A) इत्यस्य समीचीनं व्याख्यानं ***नास्ति***।

**116.** पञ्चमीकक्षायाः मनजीतः अध्यापकैः सह मित्रैः सह, एवमेव द्विवर्षीयबालकेन सह भिन्न-भिन्न प्रकारैः वार्तालापं करोति। अस्य अयम् अर्थः यत् सामाजिक परिस्थित्यनुसारं स भाषां प्रयोक्तं जानाति। भाषाप्रयोगस्य इयं पद्धतिः का मन्यते ?

(1) व्यावहारिकता (Pragmatics)
(2) वक्तृकला
(3) प्रकृतिवादिता
(4) अर्थवादिता

**117.** काचिद् माता एतद् वीक्षते यत तस्य बालकः यदाकदा तान् प्रयोगान् करोति यान् स कदापि प्रौढेभ्यः भगिनी-भ्रातृभ्यः वा परिवारे नाशृणोत्। तस्याः विश्वासः एतद् अनुमोदयति –

(1) रचनावादिता (2) बहुवादीयता
(3) सहजता (4) व्यवहारवादिता

**118.** कौशलसमूहाः ये औपचारिक-निर्देश पठनात्पूर्वं वर्धन्ते तथा च पश्चात् काले शैक्षणिक योग्यता विकासाय आधारं प्रयच्छन्ति, कथ्यन्ते –

(1) आविर्भावि-गुणधर्मिता (Properties)
(2) आविर्भावि-साक्षरता (Literacy)
(3) अविर्भावि समाधानम् (Solution)
(4) अविर्भावी पाठ्यक्रमः (Curriculum)

**119.** काचित् मातामही गृहे बालकान् पुस्तकात् कथाः रुचिपूर्वकं श्रावयति। अनेन प्रकारेण सा तान् पुस्तकानि, नवविचारान् च पठितुं प्रेरयति। अस्यां प्रक्रियायां बालकाः अपि सक्रियाः भवन्ति। एषा पद्धति कथ्यते –

(1) वार्तालापीय पठनम् (Dialogic)
(2) उच्चैः पठनम् (Aloud Reading)
(3) प्रतिमान-पठनम् (Model)
(4) सह-पठनम् (Shared)

**120.** अध्यापनस्य सा पद्धतिः, यस्यां पठनं आधारभूततत्त्वेभ्यः यथा, अक्षरेभ्यः ध्वनिग्रमेभ्यश्च (Phonemes) प्रारभते, यस्यां च समग्र पठनात् पूर्वं ध्वनिग्रामाः शब्देषु योजयितुं शक्यन्ते, कथ्यते –

(1) समग्र भाषा पद्धतिः
(2) संरचनात्मक पद्धतिः
(3) 'ऊर्ध्वाधः' (Top-down) पद्धति
(4) 'अधः ऊर्ध्वं' (Bottom-up) पद्धति

Prepp Your Personal Exams Guide

# भागः V
# भाषा II
# संस्कृतम्

***निर्देशः : सर्वाधिकं समीचीनं विकल्पं चित्वा निम्नलिखितप्रश्नानाम् (प्रश्नसङ्ख्या 121 – 135) उत्तरं दीयताम् ।***

**121.** अध्यापकः भाषा-छात्राणां श्रवणकौशलं केन उपायेन वर्धयितुं समर्थः ?

(1) छात्राणां कृते विभिन्नप्रकारान् जनान् च श्रोतुं अवसरप्रदानेन तथा च श्रवणक्रियासु नियोजनेन।

(2) यत्किञ्चिद् अनायासं श्रूयते तद् अपि सावधानतया श्रोतुं प्रेरणेन।

(3) छात्रैः सह कक्षायां, कक्षायाः बहिश्चापि निरन्तरं सम्भाषणेन।

(4) अन्यैः भाषाकौशलैः सह संयोगेन विना केवलं श्रवणकौशले केन्द्रीभूतेन।

**122.** *कथनम् (A) :*

प्राथमिके स्तरे भाषायाः शुद्धता सर्वाधिका महत्त्वपूर्ण अस्ति।

*कारणम् (R) :*

व्याकरणं प्राथमिक पाठ्यक्रमस्य अविभाज्यम् अङ्गमस्ति।

निम्नलिखित संकेतेभ्यः शुद्धम् उत्तरं चिनुत।

(1) (A) सत्यम् अस्ति, परं (R) असत्यम् अस्ति।

(2) (A) असत्यम् अस्ति, परं (R) सत्यम् अस्ति।

(3) उभे (A) च (R) च सत्ये स्तः तथा च (R), (A) इत्यस्य समीचीनं व्याख्यानमस्ति।

(4) (A) च (R) उभे सत्ये स्तः, परं (R), (A) इत्यस्य समीचीनं व्याख्यानं ***नास्ति***।

**123.** भाषायाः प्रकृतेः विषये, भाषाशिक्षणस्य प्रकृतेः विषये, बालशिक्षा व्यवस्थायां उभयोश्च प्रायोगिकताविषये ये सिद्धान्ताः विश्वासाश्च सन्ति, ते किं कथ्यन्ते ?

(1) उपागमः (Approach)

(2) क्रियाविधिः (Technique)

(3) पाठ्यक्रमः (Syllabus)

(4) विषयवस्तु (Content)

**124.** रचनात्मक-मूल्याङ्कनम् (Formative Evaluation) अस्ति –

(1) पूर्वनिर्धारिते अथवा विशेष अवस्थायां क्रियान्वयनम्।

(2) अपरिवर्तनीयम्।

(3) अध्ययन-अध्यापन-प्रक्रियायां किं भवति।

(4) निरन्तरं विकासेन प्रोन्नत्या च सम्बद्धता।

**125.** बालकानां कृते पाठयोजना निर्माणकाले अध्यापकः पूर्णतया 'समग्रशरीर प्रतिक्रिया' विधिम् अवलम्बितवान्। निम्नलिखितेषु कः प्रविधिः पाठे 'समग्र शरीर प्रतिक्रिया' विधिं प्रवेष्टुं प्रयोक्तव्यः ?

(1) कक्षायां काश्चन श्रवणक्रियाः प्रयोक्तव्या।

(2) सर्वाः क्रियाः विहाय प्रश्नाः प्रष्टव्या छात्राश्च उत्तरितुं कथयितव्या।

(3) कक्षायां शारीरिक क्रियाः अवश्यं प्रवेष्टव्याः।

(4) ताः क्रियाः प्रयोक्तव्याः याः छात्रान् स्वासनेषु तिष्ठतः एव युगलेषु समूहेषु वा कार्यं कर्तुं सहयोगं कुर्युः।

**126.** व्याकरणविषये का अवधारणा एनं विश्वासं वर्धयति यत् भाषाशिक्षणं नियमशिक्षणमेवास्ति।

(1) सम्प्रेषणात्मिका (Communicative)

(2) व्याकरण-अनुवादात्मिका (Grammar Translation)

(3) निर्गमनात्मिका (Deductive)

(4) आगमनात्मिका (Inductive)

**127.** पञ्चमीकक्षायां अध्यापकः स्वतन्त्रलेखनकार्यं दातुं योजनां निर्माति । अध्यापकेन कस्मिन् विषये केन्द्रितेन भवितव्यम् ?

(1) प्रवाहे शुद्धतायाञ्च उभयोः

(2) छात्रस्य हस्तलेखने

(3) पाठ्यविषयस्य शुद्धतायाम्

(4) विषयस्य प्रवाहे

**128.** 'ऊर्ध्वाधः' इत्यस्य अर्थोऽस्ति, यत् 'समग्रार्थोऽवबोद्धव्यः'। तदा 'अधः-ऊर्ध्वम्' (Bottom-up) इत्यस्य कोऽर्थः ?

(1) पाठ्यस्य शब्देषु सूक्तिषु च केन्द्रीभवितव्यम्

(2) संक्षिप्त प्रश्नोत्तरेषु केन्द्रीभाव्यम्

(3) सारः मुख्यार्थश्च ग्राह्यौ

(4) पूर्वपठने केन्द्रीभवितव्यम्

**129.** निम्नलिखितेषु अध्यापकस्य प्रमुखं दायित्वं किमस्ति ?

(1) विभिन्नकक्षासु छात्राणां समूहनिर्माणम्।

(2) छात्रेभ्यः निर्देशः।

(3) छात्रस्य सम्प्रेषणात्मक-आवश्यकतानां ज्ञानम्।

(4) अध्यापनार्थं समुचितसामग्री चयनम्।

**130.** एकः शिशुः एकं पुस्तकं गृह्णाति। सः शीर्षं उपरिष्टात् कृत्वा सम्यग्रूपेण गृह्णाति, पृष्ठानि च परिवर्तते । एतत्समग्रतया सम्मिलितं करोति –

(1) उद्भाविनीम् गुणवत्ताम्

(2) उद्भाविनं समाधानकौशलम्

(3) उद्भावितानि साक्षरता कौशलानि (Emergent literacy skills)

(4) उद्भाविनं पाठ्यक्रमम्

**131.** *कथनम् (A) :*

छात्राः भाषाम् अधिगृह्णन्ति यतः ते जन्मतः एव भाषां गृहीतुं तत्पराः भवन्ति। परिवेषस्य अस्मिन् कार्ये किमपि योगदानं नास्ति।

*कारणम् (R) :*

छात्रकेन्द्रितः कक्षा परिवेषः भाषा-अधिग्रहणे महत्त्वपूर्णं प्रभावं ददाति।

निम्नलिखित संकेतेभ्यः शुद्धम् उत्तरं चिनुत।

(1) (A) सत्यम् अस्ति, परं (R) असत्यम् अस्ति।

(2) (A) असत्यम् अस्ति, परं (R) सत्यम् अस्ति।

(3) (A) तथा (R) उभे सत्ये स्तः तथा च (R), (A) इत्यस्य समीचीनं व्याख्यानम् अस्ति।

(4) (A) तथा (R) उभे सत्ये स्तः, परं (R), (A) इत्यस्य समीचीनं व्याख्यान ***नास्ति***।

**132.** पठनस्य सा पद्धतिः यस्यां प्रकरणादेन शब्दार्थः ज्ञायते कथ्यते –

(1) समग्र-भाषा उपागमः

(2) संरचनात्मक-उपागमः

(3) संप्रेषणात्मक-उपागमः

(4) अधः-ऊर्ध्व-उपागमः

**133.** भाषायाः विषये चिन्तनस्य वार्तालापस्य च योग्यता अस्ति –

(1) उद्भाविनी सक्षमता

(2) इतरविषयी - भाषावैज्ञानिक योग्यता

(3) ध्वन्यात्मक अवबोधः

(4) वक्तुः सक्षमता

**134.** एका माता द्वितीयकक्षायाः अध्यापकं कथयति यत् तया निरीक्षितं यत् तस्याः बालकः यदा कदा तादृशं भाषाप्रयोगं करोति यत्तया कस्मादपि प्रौढात् भगिनी भ्रातुः वा कदापि न श्रुतः । एतत्कथं सम्भवति ? अस्य प्रश्नस्य किमुत्तरं समीचीनम् अस्ति ।

(1) बालकः तदा भाषां शिक्षति यदा वयं बालकस्य भाषां शक्तिकृतां कुर्मः ।

(2) रचनात्मक-उपागमानुसार, बालकाः नवीनाः भाषाः अन्वेष्टुं सक्षमा भवन्ति ।

(3) बालकः केवलं स्वप्रौढजनाम् अनुकृत्य शिक्षति ।

(4) मानवमस्तिष्कं सहजातरूपेण भाषां शिक्षितु योग्यम् अस्ति ।

**135.** पूर्वतरं साक्षरतां प्रोत्साहयितुं प्रौढजनः, एक बालकश्च उभौ सह एव एकं पुस्तकं पश्यतः । प्रौढः जनः प्रश्नान् पृच्छति वार्तालापम् प्रारब्धुम्, तदनु उभयोः भूमिका परिवर्तते । ततः बालकः प्रौढं प्रश्नान् पृच्छति । इयं पद्धतिः किं कथ्यते ?

(1) वार्तालापीय-पठनम्

(2) कथाश्रावणम्

(3) आदर्शपठनम् (Model reading)

(4) सहपठनम्

***निर्देशः : अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां (प्रश्नसङ्ख्या 136 – 143) विकल्पात्मकोत्तरेषु उचिततमम् उत्तरं चिनुत ।***

मन्दरपर्वते दुर्दान्तः नाम सिंहः वसति स्म । सः च सर्वदा बहूनां पशूनां वधं करोति स्म । एकदा सर्वे पशवः सिंहस्य समीपम् अगच्छन् अवदन् च — मृगेन्द्र ! त्वं किमर्थं सर्वदा पशूनां वधं करोषि ? प्रसीद । वयं स्वयं तव भोजनाय प्रतिदिनम् एकम् पशुं प्रेषयिष्यामः ।

ततः सिंहः अवदत् — यदि यूयम् एवम् इच्छथ, तर्हि भवतु तत् । ततः प्रभृति एकः पशुः प्रतिदिनं क्रमेण सिंहस्य समीपं गच्छति स्म ।

एकदा एकस्य शशकस्य वारः समायातः । सः अचिन्तयत् — यदि मम मरणं निश्चितम् एव, तर्हि मन्दम् एव गच्छामि । सः अतिविलम्बेन सिंहस्य समीपम् अगच्छत् ।

तत्र सिंहः तु क्षुधया पीडितः आसीत् । अतिक्रुद्धः सः शशकम् अपृच्छत् — त्वं कथं विलम्बात् समायातः ? शशकः सविनयम् अवदत् महाराज ! न मम दोषः । मार्गे अपरः सिंहः आसीत्, सः माम् अपश्यत् अवदत्, च "अहम् अस्य वनस्य राजा । अहं त्वां भक्षयिष्यामि ।" अहं तम् अवदम् — अस्य वनस्य राजा तु दुर्दान्तः नाम सिंहः अस्ति । सः अद्य मां भक्षयिष्यति । अहम् अधुना तस्य भोजनाय गच्छामि । अहम् अत्र पुनः आगमिष्यामि इति शपथं कृत्वा अत्र आगच्छम् । एतत् श्रुत्वा सः सिंह अतिक्रुद्धः अभवत् ।

दुर्दान्तः क्रोधेन अवदत् — रे शठ ! कुत्र अस्ति सः अपरः सिंहः ? तं सत्वरं मां दर्शय । शशकः सिंहम् एकस्य गभीरस्य कूपस्य समीपम् अनयत् अकथयत् च — पश्यतु महाराज ! अस्मिन् कूपे एव सः सिंहः वसति ।

तस्य कूपस्य जले दुर्दान्तः स्वप्रतिबिम्बम् अपश्यत् अवदत् च एषः एव सः सिंहः? क्रोधेन परिपूर्णः सः दुर्दान्तः आत्मानं कूपे अक्षिपत् पञ्चत्वं च अगच्छत् ।

उक्तं हि यथा —

बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम् ।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः ॥

**136.** बहूनां पशूनां वधं कः करोति स्म ?

(1) ऋक्षः

(2) चित्रकः

(3) व्याघ्रः

(4) सिंहः

**137.** अत्र गद्यांशे 'मृगेन्द्र !' इति सम्बोधनं कस्मै प्रयुक्तम् ?

(1) महिषाय

(2) नृपाय

(3) सिंहाय

(4) मृगाय

**138.** "यदि यूयम् एवम् इच्छथ, तर्हि भवतु तत्" कथनमिदं कस्य वर्तते ?

(1) सिंहस्य

(2) लोमशस्य

(3) शृगालस्य

(4) शशकस्य

**139.** अतिविलम्बेन सिंहस्य समीपम् कः अगच्छत् ?

(1) लोमशः

(2) शशकः

(3) शृगालः

(4) वृषभः

**140.** 'इदानीम्' इत्यस्मिन् अर्थे गद्यांशे कः शब्दः प्रयुक्त ?

(1) सर्वदा

(2) एकदा

(3) पुनः

(4) अधुना

**141.** 'सविनयम्' इदं पदं किम् अस्ति ?

(1) अव्ययः

(2) प्रत्ययः

(3) विशेषणम्

(4) क्रियाविशेषणम्

**142.** 'समायात' इत्यस्य पदस्य निर्वचनं किम् अस्ति ?

(1) सम + आ + या + क्त

(2) सम् + आ + या + अतच्

(3) सम् + आ + या + क्त

(4) सम + आय् + आत

**143.** निम्नलिखितेषु यत् क्रियारूपं अन्येभ्यः बाह्यम् अस्ति, तदुच्यताम् –

(1) अपृच्छत्

(2) गच्छामि

(3) अगच्छन्

(4) आसीत्

www.prepp.in

Prepp Your Personal Exams Guide

***निर्देशः : अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां (प्रश्नसङ्ख्या 144 – 150) विकल्पात्मकोत्तरेषु उचिततमम् उत्तरं चिनुत ।***

एकदा बालः सिद्धार्थः प्रातः भ्रमणाय उपवनम् अगच्छत् । उपवने बहवः खगाः मधुरं कूजन्ति स्म । सिद्धार्थः पक्षिणः अपश्यत् । तेषां कलरवं श्रुत्वा अतुष्यत् । किंचित् कालानन्तरं तस्य भ्राता देवदत्तः अपि आखेटं कर्तुम् उपवनम् आगच्छत् । सः शरेण आकाशे एकं हंसम् अविध्यत् । शरेण विद्धः हंसः भूमौ अपतत् । सिद्धार्थः करुणया तं हंसं कुटीरम् आनयत् । तत्र हंसस्य परिचर्याम् अकरोत् । देवदत्तः स्वशरेण विद्धं हंसं ग्रहीतुं तत्र आगच्छत् । सिद्धार्थः देवदत्तम् अवदत् — त्वं हंसं मारयितुम् इच्छसि, किन्तु अहम् एनं रक्षितुम् इच्छामि । त्वं घातकः, अहं रक्षकः । अतः अयं हंसः मम एव ।

अथ सिद्धार्थस्य देवदत्तस्य च मध्ये विवादः अभवत् । देवदत्तः सर्वं निवेदयितुं नृपस्य समीपम् अगच्छत् । सिद्धार्थः अपि तेन सह तत्र अगच्छत् । देवदत्तः नृपाय सर्वं वृत्तान्तम् अकथयत् । सिद्धार्थः अपि स्वपक्षम् अवदत् । नृपः तत् सर्वम् अशृणोत् निर्णयं च अकरोत् — अयं हंसः तु सिद्धार्थस्य एव, यतः सः अस्य रक्षकः । उक्तं हि — रक्षकः भक्षकात् श्रेष्ठः इति ।

**144.** सिद्धार्थः केन प्रयोजनेन उपवनम् अगच्छत् ?

(1) आखेटाय

(2) मनोरञ्जनाय

(3) नगरं द्रष्टुं

(4) भ्रमणाय

**145.** सिद्धार्थस्य देवदत्तस्य च मध्ये किम् अभवत् ?

(1) विवादः

(2) युद्धः

(3) मैत्री

(4) कलहः

**146.** 'हन्तुम्' इत्यस्मिन्नर्थे गद्यांशे कः शब्दः प्रयुक्तः ?

(1) मारयितुम

(2) अपतत्

(3) अविध्यत्

(4) ग्रहितुम्

**147.** 'अवदत्' इत्यस्मिन क्रियारूपे कः लकारः ?

(1) विधिलिङ्

(2) लुङ्

(3) लङ्

(4) लट्

**148.** 'विद्धम्' इत्यस्य पदस्य निर्वचन क्रियताम् –

(1) विध् + धम् प्रत्ययः

(2) व्यध् + इम् प्रत्ययः

(3) विध् + क्त प्रत्यय

(4) व्यध् + क्त प्रत्यय

**149.** 'घातकः' इत्यस्मिन् पदे कः कृत् प्रत्ययः ?

(1) ण्वुल्

(2) तक

(3) क

(4) अक्

**150.** 'करुणया' अस्मिन् पदे का विभक्तिः वर्तते ?

(1) चतुर्थी

(2) द्वितीया

(3) तृतीया

(4) पञ्चमी

